दिनाङ्क :- 01.09.2026

प्रात: - 06:55

## प्रधानमन्त्रिणः बिश्केक्-यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अन्यैः शङ्घाई-सहयोग-सङ्घटनस्य नेतृभिः सह ह्यः सायं किर्गिस्तानस्य राजधान्यां बिश्केक् इत्यत्र आयोजिते षष्ठे वर्ल्ड् नोमैड गेम्स् इत्यस्य आधिकारिकोद्घाटन-समारोहे भागं गृहीतवान्। अयं कार्यक्रमः यायावर-सभ्यतानां समृद्धक्रीडा-परम्पराणां, संस्कृतेः सांस्कृतिकवैभवस्य च उत्सवरूपेण आयोज्यते। पूर्वं प्रधानमन्त्री मोदी शङ्घाई-सहयोग-सङ्घटन-शिखरसम्मेलनस्य अवधौ रूस-ईरान-किर्गिज़-गणराज्य-आर्मेनिया-देशानां नेतृभिः सह द्वैपक्षिकोपवेशनं कृतवान्।

प्रधानमन्त्री अद्य शङ्घाई-सहयोग-सङ्घटनस्य षड्विंशतितमं शिखरसम्मेलनं सम्बोधयिष्यति।

## प्रह्लाद जोशी

नवीकरणीय-ऊर्जा-मन्त्री प्रह्लाद जोशी मन्त्रालयस्य उच्च-अधिकारिभिः सह समीक्षा-उपवेशनं कृतवान्। गोष्ठ्याम् हरित-ऊर्जा-क्षेत्रे भारतस्य प्रगतिम् अग्रे नेतुं तथा पूर्वोत्तर-राज्येषु नवीकरणीय-ऊर्जा-परियोजनानां विस्तारं कर्तुम् गम्भीरा चर्चा समजायत। मन्त्रिणा संसूचितं यत् प्रशासनं स्वच्छ-ऊर्जा-लक्ष्याणि प्राप्तुम् पूर्ण-प्रतिबद्धतया कार्यं विदधाति।

## केन्द्र-राज्य: सहयोग

केन्द्र-राज्ययोः परस्पर-सहयोगेन जल-प्रबन्धनस्य लक्ष्याणि प्राप्तुम् अद्य जल-शक्ति-मन्त्रालयेन विभागीय-शिखर-सम्मेलनम् आहूतम्। दिनद्वयं यावत् प्रचलन्त्याम् अस्यां गोष्ठ्याम् विविध-राज्यानाम् अधिकारिणः सहभागितां करिष्यन्ति। प्रधानमन्त्रिणः मोदिनः सङ्कल्पानुसारम् एषः मञ्चः राष्ट्रिय-जल-नीतेः त्वरितान्वयनाय मार्गं प्रशस्तं करिष्यति।

## स्वच्छता-पखवाडा

पर्यावरण-संरक्षणाय स्वच्छता-संस्कृतेः प्रसाराय च अद्य जगत्-प्रकाश-नड्डा मन्त्रिणा 'स्वच्छता-पखवाडा इत्यस्य शुभारम्भो विधीयते। सितम्बर मासस्य पंचदश दिनाङ्कं यावत् अस्य अभियानस्य माध्यमेन देशे 'सिंगल्-यूज्-प्लास्टिक्' इति वस्तुभ्यः मुक्तिं प्राप्तुं जन-जागरुकता प्रवर्धिष्यते। उर्वरक-विभागेन सर्वेभ्यः कार्यस्थलेभ्यः स्वच्छता-नियम-पालनाय च आह्वानं कृतम्।

## मणिपुर - जनगणना

प्रशासनेन मणिपुरे जनगणनाकार्यस्य स्थगनस्य निर्णयः कृतः। अयं निर्णयः केन्द्रीयगृहमन्त्रिणा अमितशाहेन ह्यः नवदिल्ल्यां मणिपुरस्य वर्तमानस्थितेः मूल्याङ्कनाय आयोजितस्य उच्चस्तरीय-समीक्षोपवेशनस्य अध्यक्षतानन्तरं कृतः। तदनन्तरं मणिपुरस्य उच्चन्यायालयेन निर्देशः दत्तः यत् अग्रिमादेशपर्यन्तं मणिपुरे जनगणनाकार्यं स्थगितमेव तिष्ठेत्।

## जीडीपी इति

भारतेन आर्थिक-जगति पुनः कीर्तिमानं रचितम् । अस्य वित्तवर्षस्य अप्रैल-जून-त्रैमास्यां देशस्य वास्तविक-सकल-गृहोत्पादः सप्त दशांश अष्ट प्रतिशत-अंकैः अवर्धत। प्रधानमन्त्री मोदी प्रावोचत् यत् वैश्विक-समाह्वानानां सम्मुखीकरणं विधाय अपि भारतेन एषा महती उपलब्धिः समर्जिता।

## भारत-जर्मनी

चतुर्थःभारत-जर्मनी-पर्यावरण-मञ्चःअद्य नवदेहल्यां निर्वहिष्यते। अस्य मञ्चस्य मुख्यम् उद्देश्यं पर्यावरण-सङ्कटस्य जलवायु-परिवर्तनस्य च समाह्वानानां सम्मुखीकरणाय द्विपक्षीय-सम्बन्धान् सुदृढं कर्तुम् अस्ति। केन्द्रीय-मन्त्री भूपेन्द्र यादवः जर्मन-मन्त्रिणा कार्स्टन्-श्नाइडर् इत्यनेन सह अस्य सम्मेलनस्य सह-अध्यक्षतां विधास्यति। अस्यां गोष्ठ्यां उभयोः देशयोः पर्यावरण-सम्बद्धेषु विविध-विषयेषु गम्भीरा चर्चा च भविष्यति।

## फुटबॉलक्रीडा

फुटबॉल इत्येतस्यां क्रीडायां ऐषमः अंडर-20 एशियाकप् इत्यस्यां चषकप्रतिस्पर्धायां भारतेन ह्यः ताश्कन्दनगरे सीरियादेशं एकं शून्यं इति अङ्कान्तरालेन पराजितम्।

भारतं ग्रुप बी इत्यस्मिन् वर्गे उज़्बेकिस्तानदेशेन, सीरियादेशेन बाङ्ग्लादेशेन च सह स्थापितम् अस्ति। भारतं गुरुवासरे अग्रिमे द्वन्द्वे उज़्बेकिस्तानदेशं सम्मुखीकरिष्यति।

।। इति वार्ताः।।